# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर् - २०१८

| | | |
|---|---|---|
| कक्षा-शास्त्रद्वितीयवर्षम् (SEM- 3) | **प्रश्नपत्रम्-५** | गुणाः -७० |
| विषयः-साहित्यम् | कोड- CC 2.3.5<br>(NEW & OLD SYLLABUS) | समयः - २ तः ५ |
| दिनाङ्कः-०८-१२-२०१८ | सन्दर्भग्रन्थः -दशरुपकम् – १ २ प्रकाशौ | |

## प्रथमान्वितिः

**प्रश्नः १ निम्नलिखितासु केचिद् द्वे कारिके व्याख्येये ।** १०

१ बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः ।
अर्थ-प्रकृतयः पञ्च ता एताः परिकीर्तिताः ॥

२ अधिकारः फलस्वाम्यधिकारी च तत्प्रभुः।
तभिर्वृत्तमभिव्यापि वृत्तं स्यादाधिकारिकम् ॥

३ औत्सुक्यमात्रमारम्भः फललाभाय भूयसे ।
प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः ॥

**प्रश्नः २ कश्चिदेकः प्रश्नः वर्णनीयः।** १०

१ गर्भसन्धेः सभेदं सोदाहरणं च वर्णनं कुरुत ।

२ फलेच्छुनायकस्य प्रारब्धकार्यस्य अवस्थाः विवेचनीयाः॥

## द्वितीयान्वितिः

**प्रश्नः ३ अधोर्लिखतासु कारिकासु केचिद् द्वे कारिके व्याख्येये ।** १०

१ बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥

२ इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनम् ।
रागः प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षयः ॥

३ नीचे घृणाधिके स्पर्धा शोभायां शौर्यदक्षते ।
गतिः सधैर्या दृष्टिश्च विलासे सस्मितं वचः॥

**प्रश्नः ४ कश्चिदेकः प्रश्नः समाधेयः ।** १०

१ अर्थोपक्षेपकाः के ? तेषां स्वरूपं सोदाहरणं वर्णनीयम् ।

२ नायक-सहायाः लक्षणोदाहरणैः विवेचनीयाः ।

## तृतीयान्विति:

**प्रश्न: ५** **प्रदत्तासु कारिकासु केचिद् द्वे कारिके व्याख्येये ।** १०

१ सावहित्थादरोदास्ते रतौ धीरेतरा क्रुधा ।

सन्तर्ज्य ताडयेद् मध्या मध्याधीरेव तं वदेत् ।

२ चिन्तानि:श्वासखेदाश्रुवैवर्ण्यग्लान्यभूषणै :।

युक्ता: षडन्त्या द्वे चाद्ये क्रीडौज्वल्यप्रहर्षितै:॥

३ भगवन्तो वरैर्वाच्या विद्वद्देवर्षिलिङ्गिन:॥

विप्रामात्याग्रजाश्चार्या नटीसूत्रभृतौ मिथ:॥

**प्रश्न: ६** **कश्चिदेक: प्रश्न: विवेचनीय : ।** १०

१ नायिकानामष्टावस्था : सोदाहरणं प्रतिपादनीया:॥

२ आरभटीवृत्तेर्लक्षणं प्रतिपाद्य सोदाहरणं तदङ्गनि विवेचनीयानि ।

## चतुर्थान्विति:

**प्रश्न: ७** केचन दश लघूत्तरीया: प्रश्ना: साध्या:। १०

१ नाट्यशास्त्रस्य रचयिता क: ?

२ प्रकाशस्य किं लक्षणम् ?

३ सन्धय: कति भवन्ति ?

४ मुखसन्धे : कति अङ्गानि ?

५ विरोधो नाम किम् ?

६ प्रासङ्गिकस्य कति भेदा: ?

७ फलार्थिभि: प्रारब्धकार्यस्य कति अवस्था: ?

८ तोटकम् नाम किम् ?

९ नियतश्राव्यं कतिविधम् ?

१० विदूषको नाम किम् ?

११ अर्थ- वृत्तय: कति ?

१२ नायिकाया: कति भेदा: भवन्ति ?

१३ नायक: कतिविध: ?

१४ स्त्रीणाम् अयत्नजा: अलङ्कारा: कति ?

१५ दशरूपके धनञ्जयकृतकारिका सङ्ख्या का ?